International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(2): 296-297
© 2020 IJSR
www.anantaajournal.com
Received: 25-01-2020
Accepted: 28-02-2020

डॉ. अनीता कुमारी
एकहरि, प्रखण्ड–लदनियाँ,
जिला–मधुबनी, बिहार, भारत

Corresponding Author:
डॉ. अनीता कुमारी
एकहरि, प्रखण्ड–लदनियाँ,
जिला–मधुबनी, बिहार, भारत

# सरूपाकृत्यप्रत्यया

डॉ. अनीता कुमारी

**प्रस्तावना**

समान रूपं यस्य स सरूपेः। तद्यथा–तव्यत् तव्य एधितव्यम्, कर्त्तव्यम् भवितव्यम् इत्यावदयः। यत– चेयम् जेयम् चिद्यातोः जिघातोः रूपम्। दाधातोः देयम, ग्लैघातोः ग्लयेम्। शप् धातोः शप्यम् लभधातोः लभ्यम्। शक् धातोः शकयम् सहधातोः सहयम् गद् धातोः गद्यम्, मद्धातोः मद्यम् चर धातोः चर्यम् इत्यादयः।

यम् –यम्यम् गेयम्। पेयम्। चेयम्। तक हसने–तक्यम्। शसु हिंसायाम्–शस्यम्। यते याचने यत्यम् जनी। प्रादुर्भावे जन्यम्। वद्यम्। शप् आक्रोश शप्यम्। डुलभष प्राप्तौ–लभ्यम्। शक्लृशक्तौ– शक्यम्। षहमर्षणे–सह्यम्। गद व्यक्तायांवाचि–गद्यम्। मदीहर्षे–मद्यम् चर गति भक्षणयोः–यर्यम्।[1]

यम –यम्यम्। अवधंपापम्। अनुद्यमन्यत्। पापिनां नाम अवधं भवति। गुरोर्नाम अनुद्यमं भवति।

उभयत्रापि अवकृव्य मित्यर्थ एव। पण्यः कम्बलः। पाण्याः गौः। वह्यम्–वहत्यनेनेति वह्यं शकटम्। अजर्यम्– न जीर्यति इति अजर्मं संगतम्। कयप्– ब्रह्मोद्यम्, ब्रह्मबद्यम्। ब्रह्मवेदस्त स्यवदनमित्यर्थः। ब्रह्मभूयं गतः। ब्रह्मत्वंगत इत्यर्थः।[2]

ब्रह्मणो हननं ब्रह्ममहत्या। अश्वस्यहननं अश्वहत्या। इण् गतौ–इत्यः ष्टुञ् स्तुतौ–स्तुत्यः। शासु अनुशिष्टौ–शिष्यः। दृङ् आदरे, आङ् पूर्वः–आदृत्यः। जुवी प्रति सेवनयोः– जुष्यः। शंसुस्तुतौ– शस्यम्, शंस्यम्। दुह प्रपूरणे–दुह्यम्–गोह्यम्। वृतु वर्त्यम्। वृधु वृध्यम्।

खनु अवदारणे–खेयम्। डुभृञ् धारणपोषणयोः– भृत्याकर्मकराः। भृर्त्तव्यो इत्यर्थः। संभृत्या सम्यक् भर्त्तव्या इत्यर्थः। मृजूषशुद्धौ परिमृज्यः, परिमार्ग्यो वा।

सोतव्यः = अभिषवद्वारा निष्पादयितव्यः क्रतु इत्यर्थे कर्मणि, राजा=लतात्मकः सोमः, सूयते = कण्डूयतेऽत्रेत्यर्थे अधिकरणे वा राजो पपदात्। 'षञ् अभिषवे' इति धातोः कयप्, दीर्घश्च निपात्यते।

सूर्यः –सरत्याकाशे इत्यर्थे 'सृगतौ' इति धातोः, सुवति =लोकं प्रेरयति इत्यर्थे 'षु प्रेरणे' इति धातोर्वा कर्तरि कयप्, रूडागमश्च निपात्यते।

मृषेद्यम– मृष, इत्युपपदाद वद् धातोः कर्मणि कयप् प्रत्ययो निपात्यते। मृषोद्य शब्दोक विशेष्य निघ्नः। उच्चाय सौन्दर्य गुणा मृषोद्याः इति।

रूच्यः –रोचते इति रूच्यः, रूच् धातोः कर्तरिकयप् प्रत्ययौ निपात्यते।

कुप्यम्– गुप्गोपने इत्यस्माद्, गुप रक्षणे इत्यस्माद् वा घातोः कर्मणि क्यप् प्रत्ययः, गुपेरादेः कुत्वं च निपात्यते। सुवर्णरजत भिन्नं धनं कुप्यं भवति। गोप्यमन्यत्।

कृष्टपच्चाः– कृष्टे स्वयमेव पच्यन्ते इत्यर्थे कृष्टोप पदात् पच् धातोः कयप् प्रत्ययः कर्मकर्तरि निपात्यते। शुद्धे–कर्मणि तु कृष्ट पाक्याः इति।

अव्यथ्यः –न व्यथते इत्यर्थे कर्तरि क्यप् प्रत्ययो निपात्यते।

मिदिर विदारणे– भिनति कूलं यः, सः मिद्यः यः सः उद्धयः नद्यः कर्तरि क्यप्। झसय धत्वं च निपात्यते।

पुष् पुष्टौ—पुष्यन्त्यस्मिन्नर्था इति पुष्यः। अधिकरणे क्यप्।
षिधु संराद्धौ—सिध्यन्त्यस्मिन्नर्था इति सिद्धयः। अत्राप्यधिकरणे कयप्।
णीञ्—प्रापणे— विनीयकल्कः। कल्कः पिष्टः औषधि विशेषः, पापमिति वा।
जिस अभिभवेजित्यो हलिः। बलेन क्रफ्टव्य इत्यर्थः। कृष्ट सभी करणार्थ यत्स्थूल काष्ठं तद् हलिरित्युच्यते। प्रति ग्राह्यम्। अपिग्राह्यम्।

पदे— अवगृह्यम्, प्रगृह्यं वा पदम्।
प्रतिग्राह्यम्। अपिग्राह्यम्।

पदे— अवगृह्यम्, प्रगृह्यं वा पदम्।

अस्वैरी = परतन्त्रः, अस्मिन्नर्थे—गृह्यकाः शूकाः। पञ्जरादिबन्धनेन परतन्त्री कृता इत्यर्थः डुकृञ् करणे—कृत्यम्।[3]

वृषु सेचने—बृष्यम्।

पत्रेऽर्थे 'युग्यम्' इति निपात्यते।

पत्रम् = वाहनम्।

युग्यो गौः। शकटादिना योक्रव्य इत्यर्थः। 'युजिरयोगे' इत्यस्मात् क्यप् कृत्वं च निपात्यते।

प्यत् —अमासह वसतोऽस्यां चन्द्रार्को इति अमावास्या, अमावस्या वा।

कृ – कार्यम्। हृ—हार्यम्। वच वाच्यम्, वाक्यम्। पच पाक्यम्। अवश्यं भवः आवश्यकम् अवश्यं भवेनीयम्—भाव्यम्।

आङ पूर्वः षु प्रसवैश्वर्य योः – आसाव्यम्। यु मिंश्रवो—याव्यम्।

डुवप् बीज सन्ताने—वाप्यम्।

रपलप व्यकृयांवाचि—राप्यम्। लाप्यम्। त्रपूष लज्जायाम्—त्राप्यम्। चमु अदने आचाम्यम्।

नयतेराङ् पूर्वाण्यत् प्रत्ययः आयादेशश्च निपात्यते आनाय्यो दक्षिणाग्नि दक्षिणाग्नि विशेषः प्रणाय्यः इति निपात्यते असम्मतो। न विद्यते सम्मतिः = पूजा, आदरो वा यस्मिन् सोऽसम्मतिः, तस्मिन्नभिधेयं प्रपूर्वान्नयतेव्यत्, आयादेश्च निपात्यते इत्यर्थः। पार्य्य मानम्। मीयतेऽनेनेत्यर्थे 'माङ्माने' इति धातोर्ण्यत, आदेः षत्वं च निपात्यते। मेयमन्यत्। सान्नाच्यं हविः। सम्यग् नीयते होमार्थमग्निं प्रति इत्यर्थे। सम्पूर्वान्नयतेः कर्मणि व्यत्, आयादेशः, उपसर्ग दीर्घत्वं च निपात्यते। सन्नेयमन्यत्।[4]

निकाय्योनिवासः निचीयते धान्यादिकमस्मिन् इत्यर्थे निपूर्वाच्चिनोतेरधिकरणेव्यत्, आयादेशः कुत्वं च निपात्यते। निचेयमन्यत्।

धाय्या सामिधेनी। धीयतेऽनयासमिदित्यर्थे धाञोकरणे व्यत प्रत्ययः निपातनाद भवति। आतोयुक्रेचिण्कृतो इति सूत्रेण युगागमः। सामेधिनी शब्द ऋगब विशेषस्य वाचकः। धेयमन्यत्। कुण्डपाय्यः क्रतु। कुण्डेनपीयते सोमोऽस्मिन्नित्यर्थे कुण्डोपपदात् 'पापाने' इति धातोरधिकरणे यत्प्रत्ययः युक् च निपात्यते।[5]

संचाय्यः क्रतुः। संचीयतेऽसौ इत्यर्थे सम्पूर्वाच्चिनोतेः कर्मणिव्यत्। आयादेशच निपात्यते।

कृत्यप्रत्ययाः शब्दस्वरूपपरिज्ञानाय अवश्यं ज्ञेयाः। तेषां भेदप्रभेदकरणेन सूक्ष्मतया तथ्यं प्रकटितं जायते। अतः ममात्र प्रयासो कृतो यत् कृत्प्रत्ययानां वर्गीकरणेन विषयस्यष्टीकरणं भवेदिति। एतद्विषये त्रयोदशशताब्द्याः विद्वान् धर्मकीर्तिः स्वकीये प्रयोगमुखे कृत्प्रत्ययानां त्रैविध्यं प्रतिपादितवान्—

'कृतस्त्रिष्वपि वर्तन्ते भावे कर्तरि कर्मणि' इति।

परन्तु मया दृश्यते यत् 'वाऽसरूपोऽस्त्रियाम्' इति सूत्रद्वारा सरूपप्रत्यय असरूपप्रत्ययश्चेति भेदौ प्राप्येते। इत्संज्ञकवर्णद्वारा अपि वर्गीकरण शक्यम्—टित्, कित्, ञित्, णित्, षित्। अर्थदृष्ट्यापि भूयान् प्रभेदः प्राप्यते—आदिकर्म, स्त्री, ताच्छील्यम्, शिल्पी, कर्मव्यतिहारः, आभीक्ष्ण्यम्, द्विरूक्तमित्यादयः। इत्थं विभिन्नदृष्ट्या कृत्प्रत्यायानां वर्गीकरणं समीचीनं रूचिकर च प्रतीयते।

**सन्दर्भः**


1. सिद्धान्तकौमुदीम्, पृष्ठसंख्या—185।
2. सिद्धान्तकौमुदीम्, पृष्ठसंख्या—207
3. सिद्धान्तकौमुदीम्, पृष्ठसंख्या—222
4. सिद्धान्तकौमुदीम्, पृष्ठसंख्या—170
5. सिद्धान्तकौमुदीम्, पृष्ठसंख्या—225